स्पर्शनाच्चैव प्राणिनां वधमेष्यसि । ऋते देवमनुष्यांश्च नान्यस्त्वां विषहिष्यते" । "आतुर्य्यं जालकैकदेशे सङ्कोचः नीलकण्ठः ।

**आतृण्ण** त्रि० आ+तृद–क्त । १हिंसिते २छिन्ने च । "तस्मादातृण्णात् प्रेरितो इत्यादिवाक्यतात्" शत०ब्रा० ।

**आतृप्य** न० आतृप्यत्यनेन आ+तृप–बा० करणे क्यप् । (आता) फलभेदे ।

**आतोद्य** न० समन्तात् तुद्यते आ+तुद–ण्यत् । वीणादौ वाद्ये । "स्रजमातोद्यशिरोनिवेशिताम्" "आतोद्यं ग्राहयामास समत्याजयदायुधम्" इति च रघुः । [ रघुः ।

**आत्त** त्रि० आ+दा–क्त । गृहीते "गामात्तसारां रघुरप्यवेक्ष्य"

**आत्तगन्ध** त्रि० आत्तोऽगृहीतोऽरिणा गन्धो गर्वो यस्य । १शत्रुणाभिभूते, २गृहीतगन्धे पुष्पादौ च । "नात्तगन्धमवधूय शत्रुभिः" माघः आत्तगन्धमनाघ्रातसौरभमनभिभूतञ्चेति" मल्लिनाथः ।

**आत्तगर्व** त्रि० आत्तोऽगृहीतोगर्व्वोयस्य । १अभिभूते ।

**आत्मकर्म्मन्** त्रि० ६त० । आत्मनः स्वस्य कर्त्तव्ये कार्य्ये "आत्मकर्म्मक्षमं देहं क्षात्रोधर्म्म इवाश्रितः" रघुः ।

**आत्मकाम** त्रि० आत्मानं कामयते कम–णिङ् अण् उप० स० । विषयान्तरेच्छानिवर्त्तनेन १आत्ममात्राभिलाषुके २आत्ममात्रज्ञानेच्छायुक्ते । "योऽकामोनिष्काम आप्तकाम आत्मकामः न तस्य प्राणा उत्क्रामन्ति" छ०उ० । "आप्ताः कामा येन स आप्तकामः कास्यन्ते कामाः आत्मकामत्वेन यस्यात्मैव नान्यःकामयितव्यो वस्त्वन्तरभूतः पदार्थोभवति । "आत्मैवान्तरोबाह्यः कृत्स्नः प्रज्ञानघन एकरसोनोर्द्धं न तिर्य्यग्नाधः" नात्मनोऽन्यत् कामयितव्यं वस्त्वन्तरं यस्य "यस्य सर्व्वमात्मैवाभूत् तत् केन कं पश्येत् शृणुयात् विजानीयाद्वा" सर्वात्मभूतं विजानन् किं कामयेत ज्ञायमानोह्यन्यत्वेन पदार्थः कामयितव्यो भवति नचासावन्यो ब्रह्मविद आप्तकामस्यास्ति" भा० । आत्मकामस्यैव यथाप्तकामता तथाप्तकामशब्दे वक्ष्यते ।

**आत्मकामेय** त्रि० आत्मकामाया इदम् ढक् । आत्मकामास्वस्विनि ततः स्वार्थे राजन्या०वुञ् । आत्मकामेयकःतदर्थे ।

**आत्मगुप्त** त्रि० आत्मना गुप्तः । स्वशक्त्यैव रक्षिते । (आलकुशी) लताभेदे स्त्री तस्याः स्पर्शने हि अतिकण्डूयनं नृणां भवति तद्भयाच्चान्यैर्नसा स्पृश्यते इति तस्या आत्मगुप्तत्वम् ।

**आत्मग्राहिन्** त्रि० आत्मानं आत्मार्थमेव वा गृह्णाति ग्रह–णिनि १उदरम्भरौ २आत्मज्ञे च ।

**आत्मघातिन्** त्रि० आत्मानं देहं हन्ति हन्–णिनि ६त० । "व्यापादयेत् इथात्मानं स्वयं योऽग्न्युदकादिभिः । अवैधेनैव मार्गेण आत्मघाती स उच्यते" इत्युक्तलक्षणे आत्मनः स्वशरीरस्य प्राणेन सह वियोजयितरि जने आत्मघातश्च द्विविधः वैधोऽवैधश्च अवैधोऽपि द्विविधः ज्ञानपूर्व्वकस्तदपूर्व्वकश्च । तत्र वैधात्मघाते न दोषः तदाहतुः मनुवृद्धगर्गौ "वृद्धः शौचस्मृते लुप्तः प्रत्याख्यातभिषक्क्रियः । आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनाम्बुभिः । तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसञ्चयः । तृतीये तूदकं कृत्वा चतुर्थे श्राद्धमाचरेत्" हेमाद्रौ अवैधात्मघातनिन्दनेन तत्राधिकारिणमाह विष्णुध० । "नरस्तु व्याधिरहितो न त्यजेदात्मनस्तनुम् असूर्य्या नाम ते लोका अन्धेन तमसावृताः । तांस्ते प्रत्यभिगच्छन्ति ये के चात्महनोजनाः । अरिष्टैरात्मनोज्ञात्वामृत्युकालमुपस्थितम् । व्याधितोभिषजा त्यक्तः पूर्णे चायुषि चात्मनः । यथायुगानुसारेण संत्यजेदात्मनस्तनुम् । तस्मिन् काले तनुं त्यक्त्वा यथेष्टफलमाप्नुयात्" अपरार्के ब्रह्मगर्भः "यो जीवितुं न शक्नोति महाव्याध्युपपीड़ितः । सोऽग्न्युदकं महायात्रां कुर्व्वन्नपि न दुष्यति" । तेन प्रयागाद्यतिरिक्तेऽपि अचिकित्स्यरोगादीनामधिकारः । एतच्च वानप्रस्थस्यैवेति विज्ञानेश्वरादयः । "आसां महर्षिचर्य्याणां त्यक्त्वाऽन्यतमया तनुम् । वीतशोकभयो विप्रो ब्रह्मभूयाय कल्पते" इति मनुना वानप्रस्थस्यैव मरणाधिकारप्रतिपादनात् । गृहस्थस्याप्यधिकार इति निर्णयसिन्धुः । प्रयागाद्यतिरिक्ते विप्रस्य तु नाधिकारः "शूद्राश्च क्षत्रिया वैश्या अन्त्यजातास्तथाधमाः । एते त्यजेयुः प्राणान् वै वर्ज्जयित्वा द्विजं नृप पतित्वा ब्राह्मणस्तत्र ब्रह्महा चात्मघातकृत्" तद्धृतवचनात् अब्राह्मणैः स्वर्गादि महाफलजिगीषया । प्रविशेज्ज्वलनं तोयं करोत्यनशनं तथेति" आदित्य पु० वाक्याच्च । तत्र प्रयागादिषु सर्व्वे वर्णा वैधात्मघाताधिकारिणः यथा "दुश्चिकित्स्यैर्महारोगैः पीड़ितस्तु पुमानपि । प्रविशेज्ज्वलनं दीप्तं करोत्यनशनं तथा अगाधतोयराशिं वा भृगोः पतनमेव च । गच्छेन्महापथं वापि तुषारगिरिमादरात् । प्रयागवटशाखायां देहत्यागं करोति च । स्वयंदेहविनाशश्च काले प्राप्ते महामतिः । उत्तमान् प्राप्नुयाल्लोकान्नात्मघाती भवेत् क्वचित् । महापापक्षयात् स्वर्गे दिव्यान् भोगान् समश्नुते । एतस्मिन्नधिकारस्तु सर्व्वेषां सर्वजन्तुषु । नराणामथ नारीणां सर्ववर्णेषु सर्वथा । ईदृशं मरणं